# Vishnuproktam Shivarchanopadesham 2

# વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશમ્ ૨

## Document Information

Text title : Vishnuproktam Shivarchanopadesham 2

File name : viShNuproktaMshivArchanopadesham2.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 25| 489-507||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશમ્ ૨

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

વિષ્ણુઃ -

(અતઃ) શિવાર્ચનં કાર્યં સર્વદા શૈવપુઙ્ગવૈઃ ।
મુક્તાઃ શિવાર્ચનેનૈવ બહવઃ પૂર્વમાસ્તિકાઃ ॥ ૪૯૦॥

શિવાર્ચનાત્પરો ધર્મો નાસ્તિ નાસ્તીતિ મે મતિઃ ।
સત્યમેતત્પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૪૯૧॥

શિવાર્ચનં પરો ધર્મસ્તપશ્ચ શિવપૂજનમ્ ।
યજ્ઞાઃ શિવાર્ચનં વિપ્રાઃ સત્યં સત્યં ન સંશયઃ ॥ ૪૯૨॥

શિવાર્ચનં કૃતં યેન ભક્તિપૂર્વકમાદરાત્ ।
તેન યાગાઃ કૃતાઃ સર્વે સાઙ્ગાઃ સર્વસ્વદક્ષિણાઃ ॥ ૪૯૩॥

શિવાર્ચનં કૃતં યેન ભક્તિપૂર્વકમાદરાત્ ।
કૃતાનિ તેન સર્વાણિ મહાદાનાનિ સન્તતમ્ ॥ ૪૯૪॥

શિવાર્ચનં કૃતં યેન ભક્તિપૂર્વકમાદરાત્ ।
તેનાધીતોઽનન્તશાખી વેદઃ સાઙ્ગો દ્વિજોત્તમાઃ ॥ ૪૯૫॥

શિવાર્ચનં કૃતં યેન ભક્તિપૂર્વકમાદરાત્ ।
તેન તીર્થાનિ સર્વાણિ સેવિતાનિ ન સંશયઃ ॥ ૪૯૬॥

શિવાર્ચનં કૃતં યેન ભક્તિપૂર્વકમાદરાત્ ।
તેન ધર્માઃ સમસ્તાશ્ચ કૃતા એવ દ્વિજોત્તમાઃ ॥ ૪૯૭॥

સર્વેષામપિ ધર્માણાં વિશ્વાસઃ ફલમીશ્વરે ।
તસ્યાપિ ફલમુત્કૃષ્ટં શ્રીમહાદેવપૂજનમ્ ॥ ૪૯૮॥

સર્વેપ્સિતાર્થાઃ સિધ્યન્તિ શ્રીમહાદેવપૂજયા ।
તિરસ્કૃતાઃ કલ્પવૃક્ષાઃ શ્રીમહાદેવપૂજકૈઃ ॥ ૪૯૯॥

તૃણીકૃતા કામધેનુઃ શિવપૂજાપરાયણઃ ।
કલ્પવૃક્ષાસ્તુ વિપ્રેન્દ્રા વિનશ્વરફલપ્રદાઃ ॥ ૫૦૦॥

ફલં શિવાર્ચનાદ્વિપ્રાઃ પ્રાપ્તવ્યં ન વિનશ્વરમ્ ।
ફલં શિવાર્ચનાત્પ્રાપ્યમનલ્પમવિનશ્વરમ્ ॥ ૫૦૧॥

શિવાર્ચનપરો મર્ત્યો ભક્તિપૂર્વકમન્વહમ્ ।
યં યં કામયતે કામં તં તમાપ્નોતિ સર્વદા ॥ ૫૦૨॥

ઇચ્છામાત્રેણ સિધ્યન્તિ તસ્યાર્થાઃ સકલા અપિ ।
ગાણપત્યં પુરા પ્રાપ્તં બહુભિઃ શિવપૂજયા ॥ ૫૦૩॥

મુક્તાશ્ચ બહવઃ પૂર્વં મહેશસ્યૈવ પૂજયા ।
અત્રૈવ નાટ્યસદને પુણ્ડરીકપુરે પુરા ॥ ૫૦૪॥

ત્રિપુરારિં સમભ્યર્ચ્ય મુક્તા જાતાશ્ચ કોટિશઃ ।
શ્રીમચ્ચિદમ્બરાધીશો યેન દૃષ્ટઃ કદાચન ॥ ૫૦૫॥

સોઽપિ મુક્તો ભવત્યેવ મહેશકૃપયા દ્વિજઃ ।
ધન્યા યૂયં શિવાસક્તાઃ શ્રીચિદમ્બરવાસિનઃ ॥ ૫૦૬॥

ભસ્મરુદ્રાક્ષવીતાઙ્ગાઃ નિઃસઙ્ગાઃ પરમાર્થિનઃ ॥ ૫૦૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશં ૨ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૫। ૪૮૯-૫૦૭॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 25 . 489-507..

Notes:

Viṣṇu વિષ્ણુ gives Upadeśa ઉપદેશ about several merits of worshiping Śiva શિવ, and especially those who have had ŚrīCidambarādhīśa darśana શ્રીચિદમ્બરાધીશ દર્શન or reside in ŚrīCidambara શ્રીચિદમ્બર.

Proofread by Ruma Dewan

*Vishnuproktam Shivarchanopadesham 2*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*